# Ganesha Stuti by Gunesha

# ગણેશસ્તુતિઃ ગુણેશકૃતા

## Document Information

Text title : Ganesha Stuti by Gunesha

File name : gaNeshastutiHguNeshakRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 8

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ગણેશસ્તુતિઃ ગુણેશકૃતા

શ્રીગણેશાય નમઃ ।

ગુણેશ ઉવાચ ।

નમામિ દેવં ગણનાથમીશં સદા સુશાન્તં હૃદિ યોગિનાં વૈ ।
અપારયોગં દૃઢયોગનાથં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૨॥

અયોગરૂપં કથિતું ત્વશક્યં નિવૃત્તિમાત્રં હ્યસમાધિસંસ્થમ્ ।
અભેદભેદાત્મકમૂલહીનં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૩॥

સદા સમાધિસ્થમનન્તપારં પ્રભું સ્વસંવેદ્યમયં વિભાન્તમ્ ।
નિજાત્મયોગેન ચ લભ્યમેવં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૪॥

વિદેહયોગેન ચ સાઙ્ખ્યરૂપં જનેન લભ્યં ગણરાજમીડ્યમ્ ।
સદા હ્યુપાધૌ ન હિતં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૫॥

સુસંસ્થિતં સર્વવિલાસયુક્તં હૃદ્વિજ્ઞબોધાત્મકમાદિદેવમ્ ।
અભેદમાત્રં પરમાર્થરૂપં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૬॥

અનાદિમધ્યાન્તમનન્તપારં સુસંવૃતં સન્તતમાત્મરૂપમ્ ।
ગણેશમાદ્યં પુરુષં પુરાણં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૭॥

અનાદિરૂપં પ્રકૃતિપ્રભેદં સદા સુબિન્દ્વાત્મકમપ્રમેયમ્ ।
અમાયિકં મોહકરં પ્રસિદ્ધં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૮॥

ગુણેષુ રૂપેણ વિરાજમાનમપારમવ્યક્તમયં ગણેશમ્ ।
ગુણૈર્વિહીનં ગુણચાલકં ચ સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૪૯॥

સમસ્વરૂપં જગદીશમેકં સુષુપ્તિરૂપં સકલાવભાસમ્ ।
અનાદિમાયામયમોહધારં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૦॥

જગન્મયં સૂક્ષ્મવિભૂતિધારં હિરણ્મયં સ્વપ્નગતં ગણેશમ્ ।
જનસ્ય વિજ્ઞાનકર પુરાણં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૧॥

સ્તુતં સદા દેવમુનીન્દ્રસિદ્ધૈઃ સ્થિતં જગન્મોહમયં પ્રસિદ્ધમ્ ।
સદા પરં સ્થૂલવિહારયુક્તં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૨॥

અસત્સ્વરૂપં વિવિધેષ્વભેદં ગણેશમાયામયશક્તિરૂપમ્ ।
મનોવચોહીનમહાનુભાવં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૩॥

રવિસ્વરૂપં હ્યમૃતં પુરાણમભેદમેકાત્મકમાત્મરૂપમ્ ।
અખણ્ડમાનન્દઘનં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૪॥

સમં સદા વિષ્ણુમચિન્ત્યભાવમભેદભેદાદિવિવર્જિતં ચ ।
સદા સુખાનન્દમયં ગણેશં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૫॥

અચિન્ત્યરૂપં સકલૈર્વિહીનં સદાશિવં મોહવિહીનમાદ્યમ્ ।
અપારવેશં સ્વસુખાવભાસં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૬॥

પદાર્થરૂપં વિવિધપ્રભેદં વિકારયુક્તં પરમપ્રમેયમ્ ।
બોધાત્મકં ત્વંપદરૂપમેવ સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૭॥

અખણ્ડમેકાત્મકવિશ્વરૂપં વિકારહીનં મહદપ્રમેયમ્ ।
ગણેશમેકં હૃદિ તત્પદસ્થં સુશાન્તયોગેશ્વરમાનતોઽસ્મિ ॥ ૫૮॥

ગણેશ ચૈતે વિવિધસ્વરૂપાઃ કલાવતારા ભવતો હિ ભવ્યાઃ ।
સુશાન્તમેકં ભવદીયરૂપં કથં વિભાવ્યં મનસા ન લભ્યમ્ ॥ ૫૯॥

યદા ચ સર્વાત્મમયં વદામિ તદા તુ સોઽહં પ્રકૃતિસ્વરૂપમ્ ।
ગકારરૂપં જગદીશભેદં ગકારમેકં શરણં પ્રપદ્યે ॥ ૬૦॥

મનોવચોહીનમથો વદામિ હ્યયોગસંયોગમયં ણકારમ્ ।
નિવૃત્તિરૂપં શરણં સદા વૈ નમામિ તે સર્વવરિષ્ઠમાદ્યમ્ ॥ ૬૧॥

ન શક્યસે વક્તુમવક્તુમેવમતો ભવન્તં પ્રણમામિ ઢુણ્ઢે ।
ગણેશ વિઘ્નેશ મહાનુભાવ પ્રસીદ ભો બ્રહ્મપતે મહાત્મન્ ॥ ૬૨॥

જન્મ ધન્યં ધન્યમક્ષિ વિદ્યા જ્ઞાનં તપઃ ફલમ્ ।
યેન દૃષ્ટો ગણાધીશઃ કૃતકૃત્યોઽમ્મિ સામ્પ્રતમ્ ॥ ૬૩॥

મહ્યં યદિ વરો દયસ્તદા ભક્તિં દૃઢાં ત્વયિ ।
દેહિ મે પરમેશાન યયા મોહો વિનશ્યતિ ॥ ૬૪॥

સૃષ્ટિસજનસામર્થ્યં ભજતાં કામપૂરણમ ।
નિર્વિઘ્નં સર્વકાર્યેષુ દેહિ વિઘ્નવિનાશન ॥ ૬૫॥

ગુણેશવચનં શ્રુત્વા સુપ્રસન્નો ગજાનનઃ ।
મેઘગામ્ભીર્યસાદૃશ્યં વચનં ત્વિદમબ્રવીત્ ॥ ૬૬॥

શ્રીગણેશ ઉવાચ ।
ભવિતા મેં મહાભક્તિઃ મૃષ્ટીનાં રચનાસ્તથા ।
નાનાવિધા ભવિષ્યન્તિ નિર્વિઘ્નં સર્વદા ભવત્ ॥ ૬૭॥

ભવદ્ભ્યઃ સર્વદાતૃત્વં ભવિષ્યતિ તથાઽનઘ ।
મહાકાર્યે સમુત્પન્ને દાસ્યેઽહં દર્શનં ચ તે ॥ ૬૮॥

સ્તોત્રં ત્વયા કૃતં યચ્ચ સર્વમાન્યં ભવિષ્યતિ ।
પઠતાં શ◌ૃણ્વતાં ચૈવ બ્રહ્મભૂતકરં મહત્ ॥ ૬૯॥

સ્તોત્રં બ્રહ્મપતેઃ સાક્ષાન્નામ્ના વૈ સ્તુતિસારકમ્ ।
ભવિષ્યતિ મહાભાગ સર્વસિદ્ધિકરં પરમ્ ॥ ૭૦॥

સકામેભ્યો જનેભ્યોઽપિ કામદં ચિન્તિતપ્રદમ્ ।
નિષ્કામેભ્યઃ સ્વભક્તેભ્યો મુક્તિદં પ્રભવિષ્યતિ ॥ ૭૧॥

મમ પ્રીતિકરં પૂર્ણં સારં સર્વત્ર ભાષિતમ્ ।
ત્રિકાલપઠનાદસ્ય સાધ્યોઽહં નાત્ર સંશયઃ ॥ ૭૨॥

શ્રીશિવ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્હિતઃ સાક્ષાદ્ગણેશો ભક્તવત્સલઃ ।
દેવસ્યાપિ વિયોગેન ગુણેશો વિમના હ્યભૂત્ ॥ ૭૩॥

ઇતિ ગુણેશકૃતા સમાપ્તા ગણેશસ્તુતિઃ । ૧.૮

*Ganesha Stuti by Gunesha*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*